12/5

# ARDHANARISVARA STOTRAS



100

SRIRANGAM.
SRI VANI VILAS PRESS,

12/5

॥ श्रीः ॥

# ॥ अर्धनारीश्वरस्तोत्रम् ॥

चाम्पेयगौरार्धशरीरकायै
कर्पूरगौरार्धशरीरकाय ।
धम्मिल्लकायै च जटाधराय
नमः शिवायै च नमः शिवाय ॥ १ ॥

कस्तूरिकाकुङ्कुमचर्चितायै
चितारजःपुञ्जविचर्चिताय ।
कृतस्मरायै विकृतस्मराय
नमः शिवायै च नमः शिवाय ॥ २ ॥

झणत्कणत्कङ्कणनूपुरायै
पादाब्जराजत्फणिनूपुराय ।
हेमाङ्गदायै भुजगाङ्गदाय
नमः शिवायै च नमः शिवाय ॥ ३ ॥

विशालनीलोत्पललोचनायै
विकासिपङ्करुहलोचनाय ।
समेक्षणायै विषमेक्षणाय
नमः शिवायै च नमः शिवाय ॥ ४ ॥

मन्दारमालाकलितालकायै
कपालमालाङ्कितकंधराय ।
दिव्याम्बरायै च दिगम्बराय
नमः शिवायै च नमः शिवाय ॥ ५ ॥

अम्भोधरश्यामलकुन्तलायै
तटित्प्रभाताम्रजटाधराय ।
निरीश्वरायै निखिलेश्वराय
नमः शिवायै च नमः शिवाय ॥ ६ ॥

प्रपञ्चसृष्ट्युन्मुखलास्यकायै
समस्तसंहारकताण्डवाय ।
जगज्जनन्यै जगदेकपित्रे
नमः शिवायै च नमः शिवाय ॥ ७ ॥

प्रदीप्तरत्नोज्ज्वलकुण्डलायै
स्फुरन्महापन्नगभूषणाय

शिवान्वितायै च शिवान्विताय
  नमः शिवायै च नमः शिवाय ॥ ८ ॥

एतत्पठेदष्टकमिष्टदं यो
  भक्त्या स मान्यो भुवि दीर्घजीवी ।
प्राप्नोति सौभाग्यमनन्तकालं
  भूयात्सदा तस्य समस्तसिद्धिः ॥ ९ ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य
श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ

अर्धनारीश्वरस्तोत्रम् संपूर्णम् ॥

॥ श्रीः ॥

# ॥ अर्धनारीश्वरस्तुतिः ॥

वन्देमह्यमलमयूखमौलिरत्नं
देवस्य प्रकटितसर्वमङ्गलाख्यम् ।
अन्योन्यं सदृशमहीनकङ्कणाङ्कं
देहार्धद्वितयमुमार्धरुद्धमूर्तेः ॥ १ ॥

तद्वन्द्वे गिरिपतिपुत्रिकार्धमिश्रं
श्रैकण्ठं वपुरपुनर्भवाय यत्र ।
वक्त्रेन्दोर्घटयति खण्डितस्य देव्या
साधर्म्यं मुकुटगतो मृगाङ्कखण्डः ॥ २ ॥

एकत्र स्फटिकशिलामलं यदर्धे
प्रत्यग्रद्रुतकनकोज्ज्वलं परत्र ।
बालार्कद्युतिभरपिञ्जरैकभाग-
प्रालेयक्षितिधरशृङ्गभङ्गिमेति ॥ ३ ॥

यत्रैकं चकितकुरङ्गभङ्गि चक्षुः
प्रोन्मीलत्कुचकलशोपशोभि वक्षः ।
मध्यं च क्रशिमसमेतमुत्तमाङ्गं
भृङ्गालीरुचिकचसंचयाञ्चितं च ॥ ४ ॥

साभोगं घननिबिडं नितम्बबिम्बं
पादोऽपि स्फुटमणिनूपुराभिरामः ।
आलोक्य क्षणमिति नन्दिनोऽप्यकस्मा-
दाश्चर्यं परमुदभूदभूतपूर्वम् ॥ ५ ॥

यत्रार्धं घटयति भूरिभूतिशुभ्रं
चन्द्रांशुच्छुरितकुबेरशैलशोभाम् ।
अर्धं च प्रणिहितकुङ्कुमाङ्गरागं
पर्यस्तारुणरुचिकाञ्चनाद्रिमुद्राम् ॥ ६ ॥

यत्कान्तिं दधदपि काञ्चनाभिरामां
प्रोन्मीलद्भुजगशुभाङ्गदोपगूढम् ।
बिभ्राणं मुकुटमुपोढचारुचन्द्रं
संधत्ते सपदि परस्परोपमानम् ॥ ७ ॥

आश्चर्यं तव दयिते हितं विधातुं
प्रागल्भ्यं किमपि भवोपतापभाजाम् ।

अन्योन्यं गतमिति वाक्यमेकवक्त्र-
प्रोद्भिन्नं घटयति यत्र सामरस्यम् ॥ ८ ॥

प्रत्यङ्गं घनपरिरम्भतः प्रकम्पं
वामार्धं भुजगभयादिवैति यत्र ।
यत्रापि स्फुटपुलकं चकास्ति शीत-
स्वःसिन्धुस्नपिततयेव दक्षिणार्धम् ॥ ९ ॥

एकत्र स्फुरति भुजंगभोगभङ्गि-
र्नीलेन्दीवरदलमालिका परत्र ।
एकत्र प्रथयति भास्मनोऽङ्गरागः
शुभ्रत्वं मलयजरञ्जनं परत्र ॥ १० ॥

एकत्रार्पयति विषं गलस्य कार्ष्ण्यं
कस्तूरीकृतमपि पुण्ड्रकं परत्र ।
एकत्र द्युतिरमलास्थिमालिकाना-
मन्यत्र प्रसरति मौक्तिकावलीनाम् ॥ ११ ॥

एकत्र स्रुतरुधिरा करीन्द्रकृत्तिः
कौसुम्भं वसनमनश्वरं परत्र ।
इत्यादीन्यपि हि परस्परं विरुद्धा-
न्येकत्वं दधति विचित्रधाम्नि यत्र ॥ १२ ॥

दन्तानां सितिमनि कज्जलप्रयुक्ते
मालिन्येऽप्यलिकविलोचनस्य यत्र ।
रक्तत्वे करचरणाधरस्य चान्यो
नान्योन्यं समजनि नूतनो विशेषः ॥ १३ ॥

कण्ठस्य भ्रमरनिभा विभार्धभागं
मुक्त्वा किं स्थितिमकरोच्छिरोरुहार्धे ।
अर्धं वा कनकसदृग्रुचिः कचानां
संत्यज्य न्यविशत किं गलैकदेशे ॥ १४ ॥

सौवर्णः करकमले यथैव वामे
सव्येऽपि ध्रुवमभवत्तथैव कुम्भः ।
क्रीडैकप्रसृतमतिर्विभुर्बिभर्ति
स्वाच्छन्द्यादुरसि तमेव नूनमेनम् ॥ १५ ॥

यत्रासीज्जगदखिलं युगावसाने
पूर्णत्वं यदुचितमत्र मध्यभागे ।
संरम्भाद्गलितमदस्तदेव नूनं
विश्रान्तं घनकठिने नितम्बबिम्बे ॥ १६ ॥

इत्यादीन्प्रविदधुरेव यत्र ताव-
त्संकल्पान्प्रथमसमागमे गणेन्द्राः ।

यावत्स प्रणतिविधौ पदारविन्दं
भृङ्गीशः परिहरति स्म नाम्बिकायाः ॥ १७ ॥

किमयं शिवः किमु शिवाथ शिवा-
विति यत्र वन्दनविधौ भवति ।
अविभाव्यमेव वचनं विदुषा-
मविभाव्यमेव वचनं विदुषाम् ॥ १८ ॥

एकः स्तनः समुचितोन्नतिरेकमाक्षि
लक्ष्याञ्जनं तनुरपि कृशिमान्वितेति ।
लिङ्गैस्त्रिभिर्व्यवसिते सविभक्तिकेऽपि
यत्राव्ययत्वमविखण्डितमेव भाति ॥ १९ ॥

यत्र ध्रुवं हृदय एव यदैक्यमासी-
द्वाक्काययोरपि पुनः पतितं तदेव ।
यस्मात्सतां हृदि यदेव तदेव वाचि
यचैव वाचि करणेऽप्युचितं तदेव ॥ २० ॥

कान्ते शिवे त्वयि विरूढमिदं मनश्च
मूर्तिश्च मे हृदयसंमददायिनीति ।
अन्योन्यमभ्यभिहितं वितनोति यत्र
साधारणस्मितमनोरमतां मुखस्य ॥ २१ ॥

उद्यन्निरुत्तरपरस्परसामरस्य-
संभावनव्यसनिनोरनवद्यहृद्यम् ।
अद्वैतमुत्तमचमत्कृतिसाधनं त-
द्युष्माकमस्तु शिवयोः शिवयोजनाय ॥ २२ ॥

लक्ष्याण्यलक्ष्याण्यपरत्र यत्र
विलक्षणान्येव हि लक्षणानि
साहित्यमत्यद्भुतमीशयोस्त-
न्न कस्य रोमाञ्चमुदञ्चयेत ॥ २३ ॥

जूटाहेर्मुकुटेन्द्रनीलरुचिभिः श्यामं दधत्यूर्ध्वगं
भागं वह्निशिखापिशङ्गमधरं मध्ये सुधाच्छच्छविः ।
धत्ते शक्रधनुःश्रियं प्रतिमिता यत्रेन्दुलेखानृजु-
र्युष्माकं स पयोधरो भगवतो हर्षामृतं वर्षतु ॥ २४ ॥

इत्यर्धनारीश्वरस्तुतिः संपूर्णा ॥

॥ श्रीः ॥

# ॥ श्रीमदर्धनारीश्वराष्टोत्तरशतनामावलिः ॥

महाकैलासशिखरनिलयाय नमो नमः ।
समस्तहृदयाम्भोजनिलयायै नमो नमः ॥ १ ॥

अप्राकृतमहादेवीपुरःस्थाय नमो नमः ।
पुनरावृत्तिरहितपुरःस्थायै नमो नमः ॥ २ ॥

अनन्तानन्दबोधाम्बुनिधिस्थाय नमो नमः ।
रजताचलशृङ्गाग्रगृहस्थायै नमो नमः ॥ ३ ॥

हिमाचलेन्द्रतनयावल्लभाय नमो नमः ।
शशाङ्कशेखरप्राणवल्लभायै नमो नमः ॥ ४ ॥

वामभागकलत्रार्धशरीराय नमो नमः ।
शंकरार्धाङ्गसौन्दर्यशरीरिण्यै नमो नमः ॥ ५ ॥

विलसद्दिव्यकर्पूरगौराङ्गाय नमो नमः ।
चिदग्निकुण्डसंभूतसुदेहायै नमो नमः ॥ ६ ॥

अखण्डसच्चिदानन्दविग्रहाय नमो नमः ।
लसन्मरतकस्वच्छविग्रहायै नमो नमः ॥ ७ ॥

षोडशाब्दवयोयुक्तदिव्याङ्गाय नमो नमः ।
सहस्ररतिसौन्दर्यशरीरिण्यै नमो नमः ॥ ८ ॥

कोटिकंदर्पसदृशलावण्याय नमो नमः ।
महातिशयसर्वाङ्गलावण्यायै नमो नमः ॥ ९ ॥

रत्नमौक्तिकवैडूर्यकिरीटाय नमो नमः ।
वज्रमाणिक्यकनककिरीटिन्यै नमो नमः ॥ १० ॥

मन्दाकिनीजलोपेतमूर्धजाय नमो नमः ।
भस्मरेखाङ्कितलसन्मस्तकायै नमो नमः ॥ ११ ॥

चारुशीतांशुशकलशेखराय नमो नमः ।
शशाङ्कखण्डसंयुक्तमकुटायै नमो नमः ॥ १२ ॥

त्रिपुण्ड्रविलसत्फालफलकाय नमो नमः ।
कस्तूरीतिलकोद्भासिनिटिलायै नमो नमः ॥ १३ ॥

सोमपावकमार्तण्डलोचनाय नमो नमः ।
प्रफुल्लाम्भोरुहदललोचनायै नमो नमः ॥ १४ ॥

नासाग्रन्यस्तनिटिललोचनाय नमो नमः ।
भक्तरक्षणदाक्षिण्यकटाक्षायै नमो नमः ॥ १५ ॥

वासुकितक्षकलसत्कुण्डलाय नमो नमः ।
लसत्काञ्चनताटङ्कयुगलायै नमो नमः ॥ १६ ॥

चारुप्रसन्नसुस्मेरवदनाय नमो नमः ।
ताम्बूलपूरितस्मेरवदनायै नमो नमः ॥ १७ ॥

हिरण्यज्योतिर्विभ्राजत्सुप्रभाय नमो नमः ।
मणिदर्पणसंकाशकपोलायै नमो नमः ॥ १८ ॥

समुद्रोद्भूतगरलकंधराय नमो नमः ।
कम्बुपूगसमच्छायकंधरायै नमो नमः ॥ १९ ॥

सौदामिनीसमच्छायसुवक्षाय नमो नमः ।
सुवर्णकुम्भयुग्माभसुकुचायै नमो नमः ॥ २० ॥

अनेकरत्नमाणिक्यसुहाराय नमो नमः ।
स्थूलमुक्ताफलोदारसुहारायै नमो नमः ॥ २१ ॥

मौक्तिकस्वर्णरुद्राक्षमालिकाय नमो नमः ।
पद्मकैरवमन्दारमालिकायै नमो नमः ॥ २२ ॥

परश्वधलसद्दिव्यकराब्जाय नमो नमः ।
पद्मपाशाङ्कुशलसत्कराब्जायै नमो नमः ॥ २३ ॥

वराभयप्रदकरयुगलाय नमो नमः ।
वराभीतिप्रदानश्रीहस्ताब्जायै नमो नमः ॥ २४ ॥

कुरङ्गविलसत्पाणिकमलाय नमो नमः ।
रमणीयचतुर्बाहुसंयुक्तायै नमो नमः ॥ २५ ॥

नागयज्ञोपवीतोपशोभिताय नमो नमः ।
गिरीशबद्धमाङ्गल्यसूत्रिकायै नमो नमः ॥ २६ ॥

मत्तमातङ्गसत्कृत्तिवसनाय नमो नमः ।
विद्युत्प्रभानर्घसौवर्णवसनायै नमो नमः ॥ २७ ॥

महापञ्चाक्षरीमन्त्रस्वरूपाय नमो नमः ।
श्रीपञ्चदशवर्णैकस्वरूपायै नमो नमः ॥ २८ ॥

शिञ्जानमणिमञ्जीरचरणाय नमो नमः ।
सुपद्मरागसंकाशचरणायै नमो नमः ॥ २९ ॥

सहस्रकोटितपनसंकाशाय नमो नमः ।
सहस्रकोटिसूर्येन्दुप्रकाशायै नमो नमः ॥ ३० ॥

चक्राब्जध्वजयुक्ताङ्घ्रिसरोजाय नमो नमः ।
राजराजार्चितपदसरोजायै नमो नमः ॥ ३१ ॥

मुरारिनेत्रपूज्याङ्घ्रिपङ्कजाय नमो नमः ।
पारिजातगुणाधिक्यपदाब्जायै नमो नमः ॥ ३२ ॥

मन्दारमालिकादामभूषणाय नमो नमः ।
कनकाङ्गदकेयूरभूषितायै नमो नमः ॥ ३३ ॥

अज्ञानतिमिरध्वंसभास्कराय नमो नमः ।
श्रीकण्ठनेत्रकुमुदचन्द्रिकायै नमो नमः ॥ ३४ ॥

कमलाभारतीन्द्राणीसेविताय नमो नमः ।
शचीमुख्यामरवधूसेवितायै नमो नमः ॥ ३५ ॥

अपर्णाकुचकस्तूरीराञ्जिताय नमो नमः ।
दिव्यभूषणसंदोहरञ्जितायै नमो नमः ॥ ३६ ॥

गुहमत्तेभवदनजनकाय नमो नमः ।
मत्तेभवक्त्रषड्वक्त्रवत्सलायै नमो नमः ॥ ३७ ॥

चराचरस्थूलसूक्ष्मकल्पकाय नमो नमः ।
सृष्टिस्थितितिरोधानसंकल्पायै नमो नमः ॥ ३८ ॥

निरभ्रान्तवचोगम्यवैभवाय नमो नमः ।
देवर्षिस्तूयमानात्मवैभवायै नमो नमः ॥ ३९ ॥

विमलप्रणवाकाशमध्यगाय नमो नमः ।
चक्रराजमहामन्त्रमध्यस्थायै नमो नमः ॥ ४० ॥

पृथ्व्यप्तेजोऽनिलाकाशपूरिताय नमो नमः ।
अव्याजकरुणापूरपूरितायै नमो नमः ॥ ४१ ॥

रतिप्रख्यातमाङ्गल्यफलदाय नमो नमः ।
पतिव्रताङ्गनाभीष्टफलदायै नमो नमः ॥ ४२ ॥

मार्कण्डेयमनोभीष्टदायकाय नमो नमः ।
एकातपत्रसाम्राज्यदायिकायै नमो नमः ॥ ४३ ॥

कृतान्तकमहादर्पनाशनाय नमो नमः ।
कामक्रोधादिषड्वर्गनाशनायै नमो नमः ॥ ४४ ॥

बिडौजोविधिवैकुण्ठसंनुताय नमो नमः ।
कलशोद्भवदुर्वासःसंपूज्यायै नमो नमः ॥ ४५ ॥

कैवल्यपरमानन्दनियोगाय नमो नमः ।
शक्तिहंसवधूमुख्यनियोगायै नमो नमः ॥ ४६ ॥

स्वद्रोहिदक्षसवनविनाशाय नमो नमः ।
कलेबरान्तविश्रान्तिविनाशिन्यै नमो नमः ॥ ४७ ॥

दुःखमन्युमहामोहभञ्जनाय नमो नमः ।
दुष्टभूतमहाभीतिभञ्जनायै नमो नमः ॥ ४८ ॥

सनकादिसमायुक्तदक्षिणामूर्तये नमः ।
अनाद्यन्तस्वयंभानादिव्यमूर्त्यै नमो नमः ॥ ४९ ॥

अशेषदेवताराध्यपादुकाय नमो नमः ।
सनकादिसमाराध्यपादुकायै नमो नमः ॥ ५० ॥

अनन्तवेदवेदान्तसंवेद्याय नमो नमः ।
सर्ववेदान्तसंसिद्धसुतत्त्वायै नमो नमः ॥ ५१ ॥

निजपादाम्बुजासक्तसुलभाय नमो नमः ।
भक्तरक्षणदाक्षिण्यकटाक्षायै नमो नमः ॥ ५२ ॥

उत्पत्तिस्थितिसंहारकारणाय नमो नमः ।
अभ्रकेशमहोत्साहकारणायै नमो नमः ॥ ५३ ॥

नन्दिभृङ्गिमुखानेकसंस्तुताय नमो नमः ।
वन्दारुजनसंदोहवन्दितायै नमो नमः ॥ ५४ ॥

अनन्तकोटिब्रह्माण्डनायकाय नमो नमः ।
लीलाकल्पितब्रह्माण्डमण्डलायै नमो नमः ॥ ५५ ॥

सहस्रारमहापद्ममन्दिराय नमो नमः ।
अनाहतमहापद्ममन्दिरायै नमो नमः ॥ ५६ ॥

अकारादिक्षकारान्तवर्णज्ञाय नमो नमः ।
वाणीगायत्रीसावित्रीवर्णज्ञायै नमो नमः ॥ ५७ ॥

घोरापस्मारदनुजदमनाय नमो नमः ।
महापापौघकान्ताराविभेदिन्यै नमो नमः ॥ ५८ ॥

कैलासतुल्यवृषभवाहनाय नमो नमः ।
कामकोटिमहाभद्रपीठस्थायै नमो नमः ॥ ५९ ॥

शम्बरान्तकलावण्यदेहसंहारिणे नमः ।
भण्डदैत्यमहासेनाशासनायै नमो नमः ॥ ६० ॥

संसारामयसंछेदभेषजाय नमो नमः ।
भूतेशालिङ्गनोद्भूतपुलकायै नमो नमः ॥ ६१ ॥

सहस्रभानुसंकाशचक्रदाय नमो नमः ।
अन्तर्मुखजनानन्दफलदायै नमो नमः ॥ ६२ ॥

आदिमध्यान्तरहितदेहस्थाय नमो नमः ।
रत्नचिन्तामणिगृहमध्यस्थायै नमो नमः ॥ ६३ ॥

अनाहतमहासौख्यपदस्थाय नमो नमः ।
सुधाब्धिस्थमणिद्वीपमध्यस्थायै नमो नमः ॥ ६४ ॥

ज्योतिषामुत्तमज्योतीरूपदाय नमो नमः ।
नामपारायणाभीष्टफलदायै नमो नमः ॥ ६५ ॥

नरसिंहमहादर्पशमनाय नमो नमः ।
चन्द्रशेखरभक्तार्तिभञ्जनायै नमो नमः ॥ ६६ ॥

शाश्वतैश्वर्यविभवसहिताय नमो नमः ।
त्रिलोचनकृतोल्लासविभवायै नमो नमः ॥ ६७ ॥

निश्चलौदार्यसौभाग्यप्रबलाय नमो नमः ।
नतसंपूर्णविज्ञानसिद्धिदायै नमो नमः ॥ ६८ ॥

निजाक्षिजाग्निसंदग्धत्रिपुराय नमो नमः ।
महिषासुरदोर्वीर्यनिग्रहायै नमो नमः ॥ ६९ ॥

दारुकावनमौनिस्त्रीमोहनाय नमो नमः ।
साक्षाच्छ्रीदक्षिणामूर्तिमनोज्ञायै नमो नमः ॥ ७० ॥

पतञ्जलिव्याघ्रपादसंस्तुताय नमो नमः ।
धात्रच्युतमुखाधीशसेवितायै नमो नमः ॥ ७१ ॥

सकृत्प्रपन्नदौर्भाग्यभेदनाय नमो नमः ।
भावनामात्रसंतुष्टहृदयायै नमो नमः ॥ ७२ ॥

अचिन्त्यदिव्यमहिमारञ्जिताय नमो नमः ।
हयमेधाग्रसंपूज्यमहिमायै नमो नमः ॥ ७३ ॥

हिरण्यकिङ्किणीयुक्तकङ्कणाय नमो नमः ।
नवचाम्पेयपुष्पाभनासिकायै नमो नमः ॥ ७४ ॥

संसिद्धऋग्यजुर्वेदवाहनाय नमो नमः ।
सुपक्वदाडिमीबीजरदनायै नमो नमः ॥ ७५ ॥

केशवब्रह्मसंग्रामवारकाय नमो नमः ।
समस्तदेवदनुजप्रेरकायै नमो नमः ॥ ७६ ॥

चामीकरमहाशैलकार्मुकाय नमो नमः ।
सुमबाणेक्षुकोदण्डमण्डितायै नमो नमः ॥ ७७ ॥

महाताण्डवचातुर्यपण्डिताय नमो नमः ।
क्रूरभण्डासुरच्छेदनिपुणायै नमो नमः ॥ ७८ ॥

ब्रह्मादिकीटपर्यन्तव्यापकाय नमो नमः ।
अनङ्गजनकापाङ्गवीक्षणायै नमो नमः ॥ ७९ ॥

अनेककोटिशीतांशुप्रकाशाय नमो नमः ।
सचामररमावाणीवीजितायै नमो नमः ॥ ८० ॥

अविद्योपाधिरहितनिर्गुणाय नमो नमः ।
सर्वोपाधिविनिर्मुक्तचैतन्यायै नमो नमः ॥ ८१ ॥

शिक्षितान्तकदैतेयविक्रमाय नमो नमः ।
रक्ताक्षरक्तजिह्वादिशिक्षिकायै नमो नमः ॥ ८२ ॥

अद्वयानन्दविज्ञानसुखदाय नमो नमः ।
वृषभध्वजविज्ञाततपःसिद्ध्यै नमो नमः ॥ ८३ ॥

अनेककोटिशीतांशुशीतलाय नमो नमः ।
दक्षप्रजापतिसुतावेषाढ्यायै नमो नमः ॥ ८४ ॥

समस्तलोकगीर्वाणशरण्याय नमो नमः ।
अमृतादिमहाशक्तिसंवृतायै नमो नमः ॥ ८५ ॥

शब्दस्पर्शसुगन्धादिसाधनाय नमो नमः ।
जाग्रत्स्वप्नसुषुप्तीनां साक्षिभूत्यै नमो नमः ॥ ८६ ॥

धर्मार्थकाममोक्षैकसूचकाय नमो नमः ।
हिमाचलमहावंशपावनायै नमो नमः ॥ ८७ ॥

सर्वमन्त्रमहाचक्रस्यन्दनाय नमो नमः ।
महापद्माटवीमध्यनिवासिन्यै नमो नमः ॥ ८८ ॥

रजस्तमःसत्त्वमुखगुणेशाय नमो नमः ।
चण्डमुण्डनिहन्त्रादिसेवितायै नमो नमः ॥ ८९ ॥

परानन्दस्वरूपार्थबोधकाय नमो नमः ।
ज्ञानशक्तिक्रियाशक्तिनियुक्तायै नमो नमः ॥ ९० ॥

जलन्धरासुरशिरच्छेदनाय नमो नमः ।
दक्षाध्वरविनिर्भिन्नशासनायै नमो नमः ॥ ९१ ॥

चण्डेशदोषविच्छेदप्रवीणाय नमो नमः ।
महेशयुक्तनटनतत्परायै नमो नमः ॥ ९२ ॥

महापातकतूलौघपावकाय नमो नमः ।
अशेषदुष्टदनुजसूदनायै नमो नमः ॥ ९३ ॥

सुधाकरसितच्छत्ररथाङ्गाय नमो नमः ।
सौभाग्यजातशृङ्गारसम्भ्रमायै नमो नमः ॥ ९४ ॥

सरसीरुहसंजातप्राप्तसारथये नमः ।
बृहन्नितम्बविलसज्जघनायै नमो नमः ॥ ९५ ॥

वैकुण्ठनाथज्वलनसायकाय नमो नमः ।
श्रीनाथसोदरीरूपशोभितायै नमो नमः ॥ ९६ ॥

सप्तकोटिमहामन्त्रपूरिताय नमो नमः ।
लोपामुद्रार्चितश्रीमच्चरणायै नमो नमः ॥ ९७ ॥

सहजानन्दसंदोहसंयुक्ताय नमो नमः ।
विरक्तिभक्तिविज्ञाननिधानायै नमो नमः ॥ ९८ ॥

षड्विंशत्तत्त्वप्रासादभुवनाय नमो नमः ।
सहस्रारसरोजातनिवासायै नमो नमः ॥ ९९ ॥

अक्षरक्षरकूटस्थपरमाय नमो नमः ।
रमाभूमीसमाराध्यपादुकायै नमो नमः ॥ १०० ॥

देवकीसुतकौन्तेयवरदाय नमो नमः ।
जन्ममृत्युजराव्याधिवर्जितायै नमो नमः ॥ १०१ ॥

भुजङ्गराजविलसच्छिखिन्याकृतये नमः ।
निजभक्तमुखाम्भोजसंस्थितायै नमो नमः ॥ १०२ ॥

कोलाहलमहोदारशरभाय नमो नमः ।
श्रीषोडशाक्षरीमन्त्रमध्यस्थायै नमो नमः ॥ १०३ ॥

ज्वलज्ज्वालावलीभीमविषघ्नाय नमो नमः ।
हानिवृद्धिसमाधिक्यरहितायै नमो नमः ॥ १०४ ॥

द्रुहिणाम्भोजनयनदुर्लभाय नमो नमः ।
मत्तहंसवधूमन्दगमनायै नमो नमः ॥ १०५ ॥

प्रपञ्चनाशकल्पान्तभैरवाय नमो नमः ।
नित्ययौवनमाङ्गल्यमङ्गलायै नमो नमः ॥ १०६ ॥

हिरण्यगर्भोत्तमाङ्गकर्तनाय नमो नमः ।
नागाद्रिनिलयेशानकुटुम्बिन्यै नमो नमः ॥ १०७ ॥

वसुंधरामहाभाग्यसूचकाय नमो नमः ।
अर्धाद्रिशिखरस्थार्धनारीश्वर्यै नमो नमः ॥ १०८ ॥

पराशक्तिसमायुक्तपरेशाय नमो नमः ।
महादेवसमायुक्तमहादेव्यै नमो नमः ॥ १०९ ॥

इति श्रीमदर्धनारीश्वराष्टोत्तरशतनामावलिः
संपूर्णा ॥